श्री कार्तिकेयाष्टकं

श्री कार्तिकेयाष्टकं

अगस्त्य उवाच |
नमोऽस्तु बृंदारकबृंदवंद्य-
-पादारविंदाय सुधाकराय |
षडाननायामितविक्रमाय
गौरीहृदानंदसमुद्भवाय || 1 ||

नमोऽस्तु तुभ्यं प्रणतार्तिहंत्रे
कर्त्रे समस्तस्य मनोरथानां |
दात्रे रथानां परतारकस्य
हंत्रे प्रचंडासुरतारकस्य || 2 ||

अमूर्तमूर्ताय सहस्रमूर्तये
गुणाय गण्याय परात्पराय |
अपारपाराय परापराय
नमोऽस्तु तुभ्यं शिखिवाहनाय || 3 ||

नमोऽस्तु ते ब्रह्मविदां वराय
दिगंबरायांबरसंस्थिताय |
हिरण्यवर्णाय हिरण्यबाहवे
नमो हिरण्याय हिरण्यरेतसे || 4 ||

तपः स्वरूपाय तपोधनाय
तपः फलानां प्रतिपादकाय |
सदा कुमाराय हिमारमारिणे
तृणीकृतैश्वर्य विरागिणे नमः || 5 ||

नमोऽस्तु तुभ्यं शरजन्मने विभो
प्रभातसूर्यारुणदंतपंक्तये |
बालाय चाबालपराक्रमाय षा-
-ण्मातुरायालमनातुराय || 6 ||

मीढुष्टमायोत्तरमीढुषे नमो
नमो गणानां पतये गणाय |
नमोऽस्तु ते जन्मजरातिगाय
नमो विशाखाय सुशक्तिपाणये || 7 ||

सर्वस्य नाथस्य कुमारकाय
क्रौंचारये तारकमारकाय |
स्वाहेय गांगेय च कार्तिकेय
शैवेय तुभ्यं सततं नमोऽस्तु || 8 ||

इति श्रीस्कांदे महापुराणे काशीखंडे पंचविंशतितमोऽध्याये श्री कार्तिकेयाष्टकं |